योगवासिष्ठः/प्रकरणम् ५ (उपशमप्रकरणम्)/सर्गः ४९

श्रीवसिष्ठ उवाच ।

अथ गाधिर्गते विष्णौ पुनर्भूतादिकं क्रमात् ।

स्वयं मोहविचारार्थं बभ्रामाभ्रमिवाम्बरे ।। १

उपलभ्य तथैवात्मवृत्तान्तं जनतस्ततः ।

हरिमाराधयामास पुनरद्रिगुहां गतः ।। २

आजगामैनमल्पेन कालेनाथ जनार्दनः ।

सकृदाराधनेनैव माधवो याति बन्धुताम् ।। ३

उवाच गाधिं भगवान्मयूरमिव वारिदः ।

किं त्वं प्रार्थयसे भूयस्तपसेति प्रसादवान् ।। ४

गाधिरुवाच ।

भ्रान्तोऽस्मि देव षण्मासान्भूतकीरजनास्पदम् ।

तत्र व्यभिचरत्यस्मद्वृत्तान्तो न कथास्वपि ।। ५

मायया भूतभूर्दृष्टा त्वयेत्युक्तोऽस्मि किं प्रभो ।

मोहनाशाय महतां वचो नो मोहवृद्धये ।। ६

श्रीभगवानुवाच ।

काकतालीययोगेन चेतसि श्वपचस्थितिः ।

सर्वेषां भूतकीराणां तवेव प्रतिबिम्बति ।। ७

तेनाङ्ग तव वृत्तान्तं यथावत्कथयन्ति ते ।

प्रतिभासो हि नायाति पुनरप्रतिभासताम् ।। ८

केनचिच्छ्वपचेनान्ते ग्रामस्य रचितं गृहम् ।

तत्त्वया दृष्टमाविष्टमिष्टकाखण्डतां गतम् ।। ९

कदाचित्प्रतिभैकैव बहूनामपि जायते ।

काकोलतालस्थितिवद्विचित्रा हि मनोगतिः ।। १०

तथाहि बहवः स्वप्नमेकं पश्यन्ति मानवाः ।

स्वापभ्रमदमैरेयमदमन्थरचित्तवत् ।। ११

एकस्यामेव लीलायां रमन्ते बहुबालकाः ।

एकस्यामेव नीलायां वनस्थल्यामिवैणकाः ।। १२

वहवस्तुल्यकालं च प्रतिभासेन कर्मणाम् ।

जना यतन्ते स्वफलपाकेऽतिबहुलाकृतौ ।। १५

प्रतिबन्धाभ्यनुज्ञानां कालो दातेति या श्रुतिः ।

विप्र संकल्पमात्रोऽसौ कालो ह्यात्मनि तिष्ठति ।।१४

अमूर्तो भगवान्कालो ब्रह्मैव तमजं विदुः ।

न जहाति न चादत्ते किंचित्कस्य कदेति च ।। १५

लौकिको यस्त्वयं कालो वर्षकल्पयुगात्मकः ।

संकल्प्यते पदार्थौघैः पदार्थौघश्च तेन तु ।। १६

समानप्रतिभासोत्थसंभ्रमं भ्रान्तचेतसः ।

तथा तं दृष्टवन्तस्ते भूतकीरजनोच्चयाः ।। १७

स्वव्यापारपरो भूत्वा धियात्मानं विचारय ।

साधो गतमनोमोहमिहैवास्व व्रजाम्यहम् ।। १८

इत्युक्त्वा भगवान्विष्णुर्जगामान्तर्धिमीश्वरः ।

अतिष्ठत्कन्दरे गाधिराधिपीवरया धिया ।। ११

ततः कतिपयेष्वद्रौ मासेष्वतिगतेषु सः ।

पुनराराधयामास पुण्डरीककरं द्विजः ।। २०

ददर्श चैकदा नाथमागतं प्रणनाम तम् ।

पूजयामास मनसा चोक्तेनोवाच चेश्वरम् ।। २१

गाधिरुवाच ।

भगवन्संस्मरंश्चैतामात्मनः श्वपचस्थितम् ।
इमां संसारमायां च परिमुह्यामि चेतसा ।। २२
तदुक्त्वास्व यथावस्तु महामोहनिवृत्तये ।
एकस्मिन्नेव विमले मां नियोजय कर्मणि ।। २३
श्रीभगवानुवाच ।
ब्रह्मन् जगदिदं मायामहाशम्बरडम्बरम् ।
सर्वा आश्चर्यकलनाः संभवन्तीह विस्मृतेः ।। २४
भूतकीरपुरे मोहाद्दृष्टवांस्तत्तथा भवान् ।
इत्येतत्संभवत्येव दृश्यते हि जनैर्भ्रमः ।। २५
भूतास्त्वमिव कीराश्च दृष्टवन्तस्तथा भ्रमम् ।
मुधैवेत्यपि सत्याभं समकालादिसंभवात् ।। २५
इदं तु शृणु वक्ष्यामि यथाभूतमनिन्दितम् ।
यथैति तनुतां चिन्ता मार्गशीर्षलतेव ते ।। २७
योऽसौ कटंजको नाम श्वपचो भूतमण्डले ।
तेनैव संनिवेशेन स तथैवाभवत्पुरा ।। २८
तथैव विकलत्रत्वं प्राप्य देशान्तरं गतः ।
बभूव कीरनृपतिः प्रविवेशानलं ततः ।। २९
भवतः केवलं चित्ते जलान्तर्वर्तिनस्तदा ।
प्रतिभाता तथाभूता कटंजाचारसंस्थितिः ।।३
द्रष्टानुभूतमप्यर्थं कदाचिद्विस्मरत्यलम् ।
कदाचिदप्यदृष्टं तु चेतः पश्यति दृष्टवत् ।। ३१
यथा स्वप्नमनोराज्यधातुसंस्थितिविभ्रमाः ।
जाग्रत्यपि तथैवाङ्ग दृश्यन्ते मनसा स्वयम् ।। ३२
भविष्यद्भूतकालस्थं यथा त्रैकाल्यदर्शिनः ।
प्रतिभाभेति गाधे यत्कटंजाचरितं तथा ।। ३३
अयं सोऽहमिदं तन्म इति मज्जति नात्मवान् ।

अयं सोऽहमिदं तन्म इति मज्जत्यनात्मवान् ।। ३४

सर्वमेवाहमेवेति तत्त्वज्ञो नावसीदति ।

न गृह्णाति पदार्थेषु विभागानर्थभावनम् ।। ३५

तेनासौ भ्रमयोगेषु सुखदुःखविलासिषु ।

न निमज्जति मग्नोऽपि तुम्बीपात्रमिवाम्भसि ।। ३६

त्वं तावद्वासनाजालग्रस्तचित्तो विचेतनः ।

किंचिच्छेषमहाव्याधिरिव न स्वस्थमागतः ।। ३७

ज्ञानस्यापरिपूर्णत्वान्न शक्नोषि मनोभ्रमम् ।

विनिवारयितुं मेघमसम्यग्यत्नवानिव ।। ३८

यदेव ते मनोमात्रे सहसा प्रतिभासते ।

तरुरुच्चजनेनेव तेनैवाक्रम्यसे क्षणात् ।। ३९

चित्तं नाभिः किलास्येह मायाचक्रस्य सर्वतः ।

स्थीयते चेत्तदाक्रम्य तन्न किंचित्प्रबाधते ।। ४०

त्वमुत्तिष्ठ गिरेः कुञ्जे दशवर्षाण्यखिन्नधीः ।

तपः कुरु ततो ज्ञानमनन्तं समवाप्स्यसि ।। ४१

इत्युक्त्वा पुण्डरीकाक्षस्तत्रैवान्तरधीयत ।

वाताभ्रवद्दीपकवद्यमुनोत्पीडवत्क्षणात् ।। ४२

गाधिर्विवेकवशजं वैराग्यपदमागतः ।

शरत्समयपर्यन्ते वैरस्यमिव पादपः ।। ४३

विचित्रं चेष्टितं धातुरसमञ्जसमागतम् ।

भ्रमद्भ्रमभरोन्मुक्तमतिर्मन्दमगर्हयत् ।। ४४

जगाम करुणार्द्रात्मा नियमायोत्तमश्रिये ।

विश्रान्त्यै ऋष्यमूकं तु पयोधर इवाचलम् ।। ४५ ।

निरस्ताशेषसंकल्पस्तपस्तत्र चकार ह ।

दशवर्षाणि तेनासावात्मज्ञानमवाप ह ।। ४६ ।

अरमत तदनु स्वां प्राप्य सत्तां महात्मा ह्यपगतभयशोको भोगभूमावनीषु ।

सततमुदितजीवन्मुक्तरूपः प्रशान्तः सकल इव शशाङ्को घूर्णितापूर्णचेताः ।। ४७

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षोपायेषूपशमप्रकरणे गाधिवृत्तान्ते गाधेर्ज्ञानप्राप्तिर्नामैकोनपञ्चाशः सर्गः ।। ४९ ।।

गाध्युपाख्यानं संपूर्णम् ।